# THE YOGAYĀJÑAVALKYA

Somadeva Vasudeva

September 13, 2016

# Sigla

**N** MS NGMCP No A 1161-3, palm leaf. Colophon *fol.* $43^{v}$: *iti yogayājñavalkye sarvayogasamuccayaḥ samāptaḥ // // samvat a-pta-pka āśvinakṛṣṇapañcamyāṃ likhitaṃ samāptam iti // //* The date falls thus on Nepal *samvat* 144, on the fifth lunar day of the waning fortnight of the month Āśvina, or 1024 CE.

$\mathbf{L}_{\mathrm{ED}}$ *Bṛhadyogiyājñavalkyasmṛti* crit. ed. Swāmī Kuvalayānanda & Ragunāthaśāstrī Kokaje, Kaivalyadhāma SMYM, Lonāvalā, Poona 1976. Second revised edition.

$\mathbf{L}_{\mathrm{I}}$ British Museum MS 249 as reported in $\mathrm{L}_{\mathrm{ED}}$.

$\mathbf{L}_{\mathrm{V}}$ *"vaṅgākṣarīyaṃ hastalikhitam"* as reported in $\mathrm{L}_{\mathrm{ED}}$.

VīMiUd$_{\mathrm{ED}}$ *Vīramitrodaya* of Mitramiśra, sponsored by Vīrasiṃha, king of Orcchā, reg. 1605–1627.

PaArDa$_{\mathrm{ED}}$ *Padārthadarśā* to the *Śāradātilaka* composed by the South Indian commentator Rāghavabhaṭṭa in Vārāṇasī in 1494CE.

$\mathbf{T}_{\mathrm{C}}$ Vedāntadeśika's *Gītābhāṣyaṭīkātātparyacandrikā*. [1.] Ānandāśrama Sanskrit Series 92, 1936. [2.] *Sri Bhagavad Gita with Sri Ramanuja's Bhashya and Vedanta Desika's Commentary named Tatparya Chandrika,* ed. Sri Abhinava Desika (Uttamur) T. Viraraghavacharya, Madras: Ubhayavedāntagranthamālā, 1972.

# Abbreviations

| | |
|---|---|
| *conj.* | conjecture |
| *corr.* | correction |
| *em.* | emendation |
| *om.* | omitted |
| किं{चि}त् | deleted *akṣaras* |
| *<no.>* | supplies no. of *akṣaras* missing |
| + + + | illegible *akṣaras* |
| किं[चि]त् | parentheses indicate partly legible *akṣaras* |
| किं⌜चि⌝त् | tops of *akṣaras* illegible or only partly legible |
| $x \rightarrow y$ | citation ranges from x to y |
| †...† | directional obeli enclose corrupt passages that the present editor cannot improve upon |



Figure 1.1: MS NGMCP No A 1161-3, folio 43$^{v}$

ॐ नमो भगवते वासुदेवाय ॥ N 1$^r$
मिथिलास्थं महात्मानं सर्वयोगेश्वरेश्वरम् ।
भगवन्तं याज्ञवल्क्यं मुनिसंघैः समावृतं ।
जनकाद्यैर्नृपवरैः शिष्यैश्चान्यैर्मुमुक्षुभिः ।
योगसिद्धैस्तथान्यैश्च सम्वृतं ब्रह्मवादिभिः ।
तत्रासीनं मुनिवरं ध्यानयोगपरायणम् ।
सर्वसंशयच्छेत्तारं ब्रह्मकल्पं महामुनिम् ।
तं पृच्छन्ति महात्मान ऋषयः संश्रितव्रताः ।
संसारतरणार्थाय गुह्यं ब्रह्म सनातनम् ॥

[ऋषय ऊचुः]

भगवन्सर्वयोगेश ब्रूहि नः संशयो महान् । $L_{ED}$ 1.5
यः सारः सर्ववेदानां वेदान्तानां तथैव च ॥
सिद्धान्तानां च सर्वेषां स्मृतीनां च महामुने ।
चतुर्दशानां विद्यानां यस्तु सारः प्रकीर्तितः ॥
आत्मज्ञानं परं यच्च यज्ज्ञात्वामृतममश्नुते ।
⌜तदाचक्ष्व महाभाग सर्वयोगविदां वर ॥⌟
ॐकारो व्याहृतिश्चैव गायत्री सशिरास्तथा ।
⌜अन्तर्जलं तु कतमैः कतमैः प्राणसंयमः । $L_{ED}$ 1.15

---

**2** °योगेश्वरेश्वरम् ] N, °योगीश्वरेश्वरम् $L_{ED}$ **3** भगवन्तं याज्ञवल्क्यं ] $L_{ED}$, भगवान्याज्ञवल्क्यम्N, भगवान्याज्ञवल्क्यस् $L_I$ **3** याज्ञवल्क्यं ] $L_{ED}$, याज्ञवल्क्यं तु ] N$L_I$ **3** मुनिसंघैः ] $L_{ED}$, मुनिसां+घैः N **4** चान्यैर् ] N$L_{ED}$, चैव $L_I$ **5** तथान्यैश्च ] N$L_{ED}$, तथायोगे $L_I$ **6** तत्रासीनं ] N$L_I$, सुखासीनं $L_{ED}$ **7** ब्रह्मकल्पं ] N$L_{ED}$, ब्रह्मकल्पाम् $L_I$ **7** महामुनिम् ] N$L_{ED}$, महाद्युतिम् $L_I$, महामतिम् $L_V$ **8** महात्मान ] N, महात्मानम् $L_{ED}$ **11** सर्वयोगेश ] N, सर्वयोगीश $L_{ED}$ **11** ब्रूहि ] N$L_{ED}$, हृदि $L_V$ **12** सारः ] $L_{ED}$, सारं N **12** वेदान्तानां ] N$L_{ED}$, वेदाङ्गानां $L_V$ **15** यज् ] $L_{ED}$, यं N **17** ॐकारो ] N, तदाचक्ष्व महाभाग सर्वयोगविदांवर । ॐकारं $L_{ED}L_V$ **17** व्याहृतिश् ] N, व्याहृतींश् $L_{ED}$ **17** गायत्री ] N, गायत्रीं $L_{ED}$ **17** सशिरास् ] *corr.*, ससिरास् N, तच्छिरस् $L_{ED}$ **18** अन्तर्जलं→किमक्षरैः ] N, moved to $L_{ED}$ 1.15 **18** तु ] N, च $L_{ED}$ **18** प्राणसंयमः ] $L_{ED}$, प्राणसंयमं N

सूर्यस्य चाप्युपस्थानं कुर्यान्मन्त्रैः किमक्षरैः ।⌟
प्राणायामस्तथा ध्यानं सन्ध्योपासनमेव च ।
मार्जनाभ्युक्षणे स्नानं तथैवान्तर्जलं जपम् ।
गायत्र्याश्चैव माहात्म्यं जपयुक्तिप्रयोजनम् ।
N 1$^{v}$ उपस्थानं तथार्कस्य सारूप्यमपि चैव हि ।
$L_{ED}$ 1.10 अस्य चान्तर्गतो ह्यात्मा कथं विज्ञायते तु सः ।
त्वं हि जानासि तत्त्वेन स्वेन योगबलेन तु ॥
यजूंष्यभ्यस्यता पूर्वं पुरस्ताद्भास्करात्स्वयम् ।
साक्षाद्भगवता दृष्टस्तेन पृच्छामहे वयम् ॥
[१.] आर्षं [२.]छन्दश्च मन्त्राणां [३.] दैवत्यं [४.] ब्राह्मणं तथा ।
[५.] विनियोगं च मन्त्रार्थं ॐकाराद्येषु यद्विभो ।
⌜आर्षं च्छन्दश्च मन्त्राणां विनियोगो ऽथ ब्राह्मणः ।⌟
किमुक्तं भवते ह्येतज्ज्ञाते ऽज्ञाते ऽथ किं भवेत् ।
ब्राह्मण्यं भवते केन किं वा नित्यमुपास्यते ।
किं सातत्यं भवेद्ब्रह्म सन्ध्या येन ⁘ उपास्यते ॥
कथं संमार्जनं कुर्यान्मन्त्रैर्वरुणदेवतैः ।
$L_{ED}$ 1.25cd ⌜वैदिकं च तथा ब्रह्म ⁘ अब्लिङ्गान्यघमर्षणम् ॥⌟
केनाक्षरेण मन्त्रेण धारणा धार्यते कथम् ।

---

**19** किमक्षरैः ] N, किमात्मकैः $L_{ED}$ **20** प्राणायामस् ] N, प्राणायामं $L_{ED}$ **21** मार्जनाभ्युक्षणे ] $L_{ED}$, मार्जनाभ्युक्षणं N **21** तथैवान्तर्जलं जपम् ] $L_{ED}$, तथैवान्तर्जल++ N **22** °युक्ति° ] N, °यज्ञ° $L_{ED}$ **23** तथार्कस्य सारूप्यमपि ] $L_{ED}$, तथार्क++++++ N **24** अस्य ] N, तस्य $L_{ED}$ **25** तु ] N, च $L_{ED}$ **26** यजूंष्यभ्यस्यता पूर्वम्] N, यजूंष्यभ्यस्यमानेन $L_{ED}$ **26** भास्करात् ] N, भास्करो $L_{ED}$ **26** स्वयम् ] N, ह्ययम् $L_{ED}$ **27** दृष्टस्तेन ] $L_{ED}$, दृष्टास्तेन N **29** मन्त्रार्थं ] N, मन्त्राणाम् $L_{ED}$ **29** ॐकाराद्येषु ] N, ॐकारादेश्च $L_{ED}$ **30** आर्षं ] *em.*, आर्ष N **30** ब्राह्मणः ] N, ब्राह्मणं N **30** आर्षं→ब्राह्मणं ] N, *om.* $L_{ED}$ **31** भवते ह्येतज् ] *em.*, भवते ह्येते N, भवतीत्येतज् $L_{ED}$ **31** भवते ह्येते ] N, भवतीत्येतज् $L_{ED}$ **32** भवते केन ] N, च भवेत्केन $L_{ED}$ **32** उपास्यते ] $L_{ED}$, उपासते N **33** सातत्यं ] N, वा सत्यं $L_{ED}$ **34** देवतैः ] N, दैवतैः $L_{ED}$ **34** अन्तर्जलं→किमक्षरैः added here in $L_{ED}$

किं ध्यानं किं च वै ध्येयं किंलक्ष्यं किंस्वरूपकम् ।
किं चोपास्य विमुच्येत तत्परं ब्रूहि नो विभो ।
होमकाले तथाग्नौ तु मध्ये किं परिचिन्तयेत् ।
यस्य चैवाहुतिं दद्यात्किं तद्ब्रह्म किमात्मकम् ।
तथात्मयज्ञकाले तु स्वदेहे चिन्तयेत्कथम् ।
का विद्या का ह्यविद्या च किं वा निःश्रेयसं परम् ।
किमधीयीत वै विप्र एतत्सर्वं वदस्व नः । N $2^r$
एतच्छ्रुत्वा तु वचनं मुनीनां भावितात्मनाम् । $L_{ED}$ 1.20
तथा राजऋषीणां च स्वशिष्याणां तथैव च ।
ब्राह्मणानां हितार्थाय सर्वयोगविदां वरः ।
आविष्कर्तुमनाः प्रश्नं विस्तरेण महामतिः ।
भगवान्याज्ञवल्क्यस्तु प्रत्युवाच मुनींस्तदा ।

[याज्ञवल्क्य उवाच]

श्रूयतां सम्प्रवक्ष्यामि यत्सारं ज्ञानमुत्तमम् ॥
वेदान्ताभिहितं यच्च स्मृतिसिद्धान्तयोरपि ।
तस्यार्थं सम्प्रवक्ष्यामि **योगसारसमुच्चयम्** ।
येन यत्क्रियते कर्म नैत्यकं यद्द्विजातिभिः ॥
ब्राह्मण्यं भवते येन ब्रह्मसायोज्यतां व्रजेत् ।
ॐकारो व्याहृतीश्चैव गायत्री सशिरास्तथा ।
⌜वैदिकं च तथा ब्रह्म ꣳ अब्लिङ्गान्यघमर्षणम् ।⌟

---

**37** किंलक्ष्यं ] N, किं लक्ष्यं $L_{ED}$ **37** किंस्वरूपकम् ] N, किं स्वरूपकम् $L_{ED}$ **38** किं ] N, यच् $L_{ED}$ **40** किं तद्ब्रह्म किमात्मकम् ] N, किं ब्रह्म किमुतात्मकम् $L_{ED}$ **41** तथात्मयज्ञकाले ] N, तथान्नयज्ञकाले $L_{ED}$ **42** निःश्रेयसं ] $L_{ED}$, निश्रेयसं N **43** किमधीयीत ] $L_{ED}$, किमधीयेत N **45** राजऋषीणां च ] N, राजर्षीणां *(unmetrical)* $L_{ED}$, **52** तस्यार्थं ] N, तत्सर्वं $L_{ED}$ **53** नैत्यकं ] $L_{ED}$, नैत्यके N **54** भवते ] N, लभते $L_{ED}$ **54** ब्रह्मसायोज्यतां ] N, ब्रह्मसायुज्यतां $L_{ED}$ **55** व्याहृतीश्चैव ] N, व्याहृतयश्च $L_{ED}$ **56** ब्रह्म ] N, कर्म $L_{ED}$ **56** अब्लिङ्गान्य् ] N, अब्लिङ्गं चा° $L_{ED}$

प्राणायामस्तथा सन्ध्या मार्जनान्तर्जलं जपः ।
सर्वमेभिस्तु कर्तव्यं ब्राह्मणैर्ब्रह्मचिन्तकैः ।
आर्षं च्छन्दश्च दैवत्यं विनियोगस्तथैव च ।
वेदितव्यं प्रयत्नेन ब्राह्मणेन विपश्चिता ।
अविदित्वा तु यः कुर्याद्याजनाध्यापनं जपम् ।
होममन्तर्जलादीनि तेभ्यश्चाल्पफलं भवेत् ।
आपद्यते स्थाणुगर्तं स्वयं वा विप्रलीयते ।
N 2$^{v}$ यातयामानि च्छंदांसि भवन्त्यल्पबलान्यपि ।
अन्तर्जलादिके जाप्ये ⁘ इतरेषामजानताम् ।
$L_{ED}$ 1.30 नाधिकारो ऽस्ति मन्त्राणामेवं श्रुतिनिदर्शनम् ।
स्वल्पमात्रं फलं तस्य होमादन्तर्जलाज्जपात् ।
स्वाध्यायाद्याजनाच्चैव भवते नात्र संशयः ॥
यस्तु जानाति तत्त्वेन ⁘ आर्षं च्छन्दश्च दैवतम् ।
विनियोगं ब्राह्मणं च मन्त्रार्थं ज्ञानकर्म च ॥
एकैकस्य ⁘ ऋचः सो हि वन्द्यो ह्यतिथिवद्भवेत् ।
देवतायाश्च सायोज्यं गच्छते नात्र संशयः ॥
⌜पूर्वोक्तेन प्रकारेण ऋष्यादीन्वेत्ति यो द्विजः ।⌟
अधिकारो भवेत्तस्य रहस्यादिषु कर्मसु
मन्त्रे मन्त्रे प्रयत्नेन ज्ञातव्यं ब्राह्मणेन तु ।
$L_{ED}$ 1.35 विज्ञाते परिपूर्णं तु स्वाध्यायफलमश्नुते ।

---

**57** मार्जनान्तर्जलं ] $L_{ED}$N$^{pc}$, म्मार्जनान्तर्जलंञ् N$^{ac}$ **57** जपः ] $L_{ED}$, जपम् N **58** एभिस्तु ] N, एव तु $L_{ED}$ **63** स्थाणुगर्तं ] N, स्थाणुगर्त्ते $L_{ED}$ **63** वा विप्रलीयते ] N, वापि प्रमीयते $L_{ED}$ **66** मन्त्राणाम्] $L_{ED}$, मन्त्रानाम् N **67** स्वल्पमात्रं ] N, अल्पमात्रं $L_{ED}$ **67** होमाद् ] $L_{ED}$, होमम् N **68** भवते नात्र ] N, भवतीह $L_{ED}$ **70** मन्त्रार्थं ] N, मन्त्रार्थ° $L_{ED}$ **71** एकैकस्य ऋषेः ] N VīMIUD$_{ED}$, एकैकस्या ऋचः $L_{ED}$ **71** हि ] N, पि $L_{ED}$ **71** वन्द्यो] $L_{ED}$, वन्ध्यो N **72** सायोज्यं ] N, सायुज्यं $L_{ED}$ **72** गच्छते नात्र ] N, गच्छत्यत्र न $L_{ED}$ **73** पूर्वोक्तेन→द्विजः ] $L_{ED}$ VīMIUD$_{ED}$, *om.* N **74** रहस्यादिषु ] N, रहस्येषु च $L_{ED}$ **74** कर्मसु ] $L_{ED}$ VīMIUD$_{ED}$, सर्वसु N

छन्दांस्ययातयामानि भवन्ति बलिनान्यपि ॥
श्रेयांश्च हवते सो हि धर्ममायुश्च विन्दति ।
दिव्यं वर्षसहस्रं तु स्वस्थाने ऽ ऋषिभिः सह ॥
तिष्ठते तत्र तैः सार्धं तत्तुल्यश्चैव जायते ।
फलं चैवापवादं च ऽ एवं बुद्ध्वा विधानतः ॥
ज्ञातव्यं हि प्रयत्नेन ब्राह्मणेन विशेषतः ।

[१. आर्षम्]

येन यदृषिणा दृष्टं सिद्धिः प्राप्ता तु येन वै । निर्वचनानि
मन्त्रेण तस्य तत्प्रोक्तमृषेर्भावस्तदार्षकम् ।

[२. छन्दः]

च्छादनाच्छन्दमुद्दिष्टं वाससी इव चाकृतेः ॥
आत्मानं च्छादितं देवैर्मृत्युभीतैस्तु वै पुरा । N 3[r]
आदित्यैर्वसुभी रुद्रैस्तेन च्छन्दांसि वै स्मृताः ॥ $L_{ED}$ 1.40

[३. देवता]

यस्य यस्य तु मन्त्रस्य ऽ उद्दिष्टा देवता तु या ।
तदाकारं भवेत्तस्य दैवत्यं देवतोच्यते ॥

[४. विनियोगः]

---

**77** छन्दांस्ययातयामानि ] = *Bhāgavatapurāṇa* 4.13.2, 10.45.48, 10.80.42, 12.6.73 **84** येन→तानि वै ] *cit.* PaArDa$_{ED}$ 1.5 **88** आत्मनाच्छादितं देवैर् ] PaArDa$_{ED}$ 1.5

---

**77** बलिनान्यपि ] N, सफलान्यापि $L_{ED}$ **78** श्रेयांश्च ] N, श्रेयश्च $L_{ED}$ **78** हवते ] N, लभते $L_{ED}$ **78** हि ] N, पि $L_{ED}$ **79** स्वस्थाने ] N, स्वस्थानम् $L_{ED}$ **80** तिष्ठते तत्र ] N, संतिष्ठते तु $L_{ED}$ **80** तत्तुल्यश्चैव ] N, तत्तुल्यो वेह $L_{ED}$ **84** सिद्धिः ] N PaArDa$_{ED}$, सिद्धिं $L_{ED}$ **85** मन्त्रेण ] $L_{ED}$, मन्त्रेन N **85** ऋषेर्भावस्तदार्षकम् ] PaArDa$_{ED}$, ऋषिभावस्तदार्षकम् $L_{ED}$, ऋषेर्भावतदार्षकम् N **87** वाससी इव चाकृतेः ] PaArDa$_{ED}$, वाससीवास आकृतिः N, आकृतेर्वासिसी यथा $L_{ED}$ **88** आत्मानं च्छादितं ] N, आत्मा संछादितं $L_{ED}$ **88** मृत्यु° ] N$L_{ED}$, मृत्योर् PaArDa$_{ED}$ **88** तु ] N, च $L_{ED}$ **88** पुरा ] $L_{ED}$, पुराः N **89** वै स्मृताः ] N, तानि वै $L_{ED}$ **92** दैवत्यं ] N, दैवतं $L_{ED}$

पुराकल्पे समुत्पन्ना मन्त्राः कर्मर्थमेव च ।
अनेनेदं तु कर्तव्यं विनियोगः स उच्यते ॥

[५. ब्राह्मणः]

[१.] निरुक्तं यस्य मन्त्रस्य [२.] समुत्पत्तिः [३.] प्रयोजनम् ।
[४.] प्रतिष्ठानं [५.] स्तुतिश्चैव ब्राह्मणः स विधीयते ॥
एतत्पञ्चविधं योगं जाप्यकाले ऽ अनुस्मरेत् ।
होमे चान्तर्जले योगे स्वाध्याये यजने तथा ॥

इति (श्री)बृहद्योगियाज्ञवल्क्ये (मन्त्रयोगनिर्णयो नाम) प्रथमो ऽध्यायः ॥१॥

[१.–२. ओंकारस्य ब्राह्मण आर्षं च]

$L_{ED}$ 2.1 प्रणवाद्याः स्मृताः मन्त्राश्चतुर्वर्गफलप्रदाः ।
तस्माच्च निःसृताः सर्वे प्रलीयन्ते च तत्र वै ॥
मङ्गल्यं पावनं धन्यं सर्वकामप्रसाधनम् ।
ओंकारः परमं ब्रह्म सर्वमन्त्रेषु नायकः ॥
प्रजापतेर्मुखोत्पन्नस्तपःसिद्धस्य वै पुरा ।
तेनोपास्तं ततस्तस्य ब्रह्म ऽआर्षं स्वयंभुवः ॥

[३.–४. ओंकारस्य छन्दो देवता च]

गायत्रं तु भवेच्छन्द अग्निर्दैवत्यमुच्यते ।

[५. ओंकारस्य विनियोगः]

आदौ सर्वेषु युञ्जीत विविधेष्वेव कर्मसु ॥
$L_{ED}$ 2.5 विनियोगः समुद्दिष्टः श्वेतो वर्ण उदाहृतः ।

---

**94** समुत्पन्ना ] N, समुद्दिष्टा $L_{ED}$ **94** कर्मर्थम् एव च ] N, कर्मर्थसिद्धये $L_{ED}$ **97** यस्य ] N, यत्तु $L_{ED}$ **98** ब्राह्मणः स विधीयते ] N, ब्राह्मणं तदिहोच्यते $L_{ED}$ **99** एतत् ] N, एवं $L_{ED}$ **99** जाप्यकाले ] N, जप्यकाले $L_{ED}$ **99** अनुस्मरेत् ] N, त्वनुस्मरेत् $L_{ED}$ **105** मङ्गल्यं ] N, मङ्गल्यः $L_{ED}$ **105** पावनं ] N, पावनं $L_{ED}$ **105** धन्यं ] N, धन्यः $L_{ED}$ **105** °प्रसाधनः ] N, °प्रसाधनम् $L_{ED}$ **106** ओंकारः ] $L_{ED}$, ओंकारः N **106** नायकण् ] $L_{ED}$, नायकं N **107** °मुखोत्पन्नस्] $L_{ED}$, °मुखोत्पन्नं N **108** ब्रह्मआर्ष° ] N, ब्रह्मार्षेयं $L_{ED}$ **108** स्वयंभुवः ] $L_{ED}$, स्वयंभुव N **110** गायत्रं तु ] N, गायत्री च $L_{ED}$ **110** दैवत्यम्] N, दैवतम् $L_{ED}$ **112** सर्वेषु ] N, सर्वत्र $L_{ED}$

त्रिमात्रं तु प्रयोक्तव्यः कर्मारम्भेषु सर्वसु ॥
त्रयः सार्धा तु कर्तव्या मात्रा तत्त्वार्थचिन्तकैः । N 3$^{v}$
देवताध्यानकाले तु प्लुतं कुर्यान्न संशयः ॥
तैलधारावदच्छिन्नं दीर्घघण्टानिनादवत् ।
अवाग्जं प्रणवस्याग्रं यस्तं वेद स वेदवित् ॥
⌜वक्रं तद्भवति ह्यादौ ⁘ ओंकारं चतुरक्षरम् ।
ऋजुत्वं संप्रपद्येत पदं प्राप्य तु पञ्चमम् ॥⌟
ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥
तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः । $L_{ED}$ 2.10
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥
उद्गीथाक्षरमेतद्ब्रह्मविदो ब्रह्मणो योगम् ।
पाशुपताश्च वदन्ति हि साङ्ख्याश्चाध्यात्मतत्त्वज्ञाः ॥
तस्य हि मात्रास्तिस्रो व्यक्ताव्यक्ता तथा परा सूक्ष्मा ।
अध्यात्मामधिभूतामथाधिदैवीं विजानीयात् ॥
सिद्धान्तानां तु सर्वेषां वेदवेदान्तयोस्तथा ।
अन्येषामपि शास्त्राणां निष्ठा ओङ्कार उच्यते ॥
प्रणावाद्याः स्मृता वेदाः प्रणवे पर्युपस्थिताः ।

---

**130** अन्येषामपि शास्त्राणां ] = *Īśvarasaṃhitā* 1.37a, = *Pārameśvarasaṃhitā* 1.66a

---

**114** त्रिमात्रं तु ] N, त्रिमात्रश्च $L_{ED}$ **114** सर्वसु ] N, सर्वत्र $L_{ED}$ **115** त्रयः ] N, तिस्रः $L_{ED}$ **115** सार्धा तु ] N, सार्धास्तु $L_{ED}$ **115** कर्तव्या ] $L_{ED}$N $^{pc}$, ककर्तव्या N $^{ac}$ **115** मात्रा ] N, मात्रास् $L_{ED}$ **118** अवाग्जं ] $L_{ED}$, अवाप्तं N **118** प्रणवस्याग्रं ] N, प्रणवस्यान्तं $L_{ED}$ **119** वक्रं→पञ्चमम् ] $L_{ED}$, *om.* N **121** तत्सदिति ] $L_{ED}$, तत्स इति N **121** ब्रह्मणस्त्रिविधः ] $L_{ED}$, ब्राह्मणःस्त्रिविधः N **122** ब्राह्मणास्तेन ] $L_{ED}$, ब्रह्मणा तेन N $^{pc}$, ब्राह्मणा तेन N $^{ac}$ **122** पुरा ] $L_{ED}$, पुराः N **125** ब्रह्मणो योगम् ] $L_{ED}$, जनाः ब्रह्मचारिनो योगाः एद् **125** उद्गीथा° ] *corr.*, उग्दीथा° $L_{ED}$ **127** हि ] N, च $L_{ED}$ **128** अध्यात्मामधिभूतामथाधिदैवीं ] $L_{ED}$, आध्यात्मा-अधिभूता-तथाधिदैवीं N **130** निष्ठा ओङ्कार ] N, निष्ठाप्योङ्कारे $L_{ED}$ **131** पर्युपस्थिताः ] $L_{ED}$, पर्यवस्थिताः N

वाङ्मयं प्रणवः सर्वं तस्मात्प्रणवमभ्यसेत् ॥
ओंकारः प्रणवस्तारस्त्र्यक्षरस्त्रिगुणः स्मृतः ।
$L_{ED}$ 2.15 उद्गीथश्च तथादित्यो हंसो नारायणो विभुः ॥
⌜सूर्यस्यान्तर्गतं सूक्ष्मं विष्णुं दिव्यं निरञ्जनम् ।⌟
पर्यायैश्च तथान्यैस्तु शास्त्रेभ्यः संप्रगीयते ॥
N 4$^{r}$ ओंकारसंज्ञं त्रिगुणं त्र्यक्षरं च त्रिदैवतम् ।
त्रिब्रह्म त्रिरवस्थानं त्रिष्कालं त्रिप्रतिष्ठितम् ॥
⌜त्रिप्रज्ञं च त्रिधामं च त्रिरवस्थं त्रिलिङ्गकम् ।
त्रिधातुकं समुद्दिष्टं सर्वगं परमेश्वरम् ॥⌟
सत्त्वं रजस्तमश्चैव त्रिगुणस्तेन स स्मृतः ।
अकारश्चाप्युकारश्च मकारश्चाक्षरत्रयम् ॥
ब्रह्मा विष्णुश्च रुद्रश्च त्रिदैवत्य उदाहृतः ।
$L_{ED}$ 2.20 अग्निवायुरविभ्यश्च त्रिमात्र इति संज्ञितः ॥
ऋग्यजुश्च तथा साम त्रिब्रह्म इति संज्ञितः ।
भूर्भुवः स्वस्त्र्यवस्थानं हृत्कण्ठं तालुकेषु च ॥
तुर्ये प्राणे तथादित्ये त्रिभ्य एव प्रतिष्ठितः।
भूतं भव्यं भविष्यच्च त्रैष्कल्यस्तेन चोच्यते ॥

---

**132** प्रणवः ] $L_{ED}$, प्रणवं N **133** ओंकारः ] $L_{ED}$, ओंकारं N **133** प्रणवस्तारस्त्र्यक्षरस्त्रिगुणः ] $L_{ED}$, प्रणवं तारं त्र्यक्षरं त्रिगुणं $L_{ED}$ **133** स्मृतः ] $L_{ED}$, परम् N **134** उद्गीथश्च ] $L_{ED}$, उद्गीथश्च N **134** तथादित्यो ] $L_{ED}$, तथादित्यं N **134** नारायणो ] $L_{ED}$, णारायणं N **134** विभुः ] $L_{ED}$, विभुं N **135** सूर्यस्या°→निरञ्जनम् ] $L_{ED}$, *om.* N **136** तथान्यैस्तु ] N, तथा चान्यैः $L_{ED}$ **137** त्रिगुणं ] $L_{ED}$, त्रिगुण° N **138** त्रिष्कालं ] N, त्रैकाल्यं $L_{ED}$ **139** त्रिप्रज्ञं→परमेश्वरं ] $L_{ED}$, *om.* N **142** अकारश्चाप्युकारश्च ] $L_{ED}$, अकारश्चाप्युकारश्च N **142** मकारश्चा° ] $L_{ED}$, मकारश्चा° N **143** त्रिदैवत्य ] $L_{ED}$, त्रिदेवत्य N **145** त्रिब्रह्म इति संज्ञितः ] $L_{ED}$, त्रिब्रह्मेति प्रकीर्तितः N **146** भूर्भुवः ] $L_{ED}$, भूभुवः N **146** स्वस्त्र्य° ] $L_{ED}$, स्वेत्र्य° N **146** तालुकेषु च ] N, तालुकेति च $L_{ED}$ **147** त्रिभ्य एव ] N, त्रिषु चैव $L_{ED}$ **147** प्रतिष्ठितः ] $L_{ED}$, प्रतिष्ठितम् N **148** भव्यं ] $L_{ED}$, भव्य° N **148** भविष्यच्च ] $L_{ED}$, भविष्यश्च N **148** त्रैष्कल्यस् ] N, त्रैष्कल्यं $L_{ED}$

अन्तःप्रज्ञो बहिःप्रज्ञो घनप्रज्ञ उदाहृतः ।
गार्हपत्यो दक्षिणाग्निराह्वनीयस्त्रिधामकम् ॥
शान्तो घोरस्तथा मूढस्त्रिरवस्थ इति स्मृतः ।
स्त्रीपुंनपुंसकं चेति त्रिलिङ्ग इति स स्मृतः ॥
⌜वातः पित्तं तथा श्लेष्मा त्रिधातुः समुदाहृतः ।⌟
त्रिप्रकारं विदित्वा तु ∴ ओंकारं मुच्यते द्विजः ॥ $L_{ED}$ 2.25
एकैकात्र भवेन् मात्रा बहुधा सा तु वै पुनः ।
तासां सर्वं वाङ्मयं यदोतं प्रोतं व्यवस्थितम् ॥
प्रथमा तस्य ∴ अकारो वाक्सत्त्वं भूहुताशनो विष्णुः ।
स्थूला जाग्रद्वृत्तिर्विज्ञेया योगतत्त्वज्ञैः ॥
ब्रह्मान्तरिक्षसंज्ञो मनोरजः सोमसंज्ञित उकारः । N $4^{v}$
मात्रा स्वप्नविकल्पा विसृष्टिसंज्ञा द्वितीया स्यात् ॥
रौद्री मकारसंज्ञा प्राणाख्या तामसी तृतीया स्यात् ।
संहरति जगत्कृत्स्नं सा सौषुप्ताख्या महानिद्रा ॥
आद्या परतरा सूक्ष्मा शान्ता गान्धर्वनिरवयवा ।
अनभिलक्ष्या सौम्या मकारसंज्ञा विज्ञानाकाशसंबद्धा ॥ $L_{ED}$ 2.30
⌜प्रपञ्चो ब्रह्मणश्चोक्ताः सार्धमात्रात्रयं बुधैः ।⌟

---

**149** अन्तःप्रज्ञो ] $L_{ED}$, अन्तःप्राज्ञो N **149** बहिःप्रज्ञो ] $L_{ED}$, बहिःप्रज्ञं N **149** घनप्रज्ञ ] $L_{ED}$, घणप्रज्ञः N **150** गार्हपत्यो ] $L_{ED}$, गार्हपत्यं N **150** दक्षिणाग्निर् ] $L_{ED}$, दक्षिणाग्निम् N **150** आह्वनीयस् ] *conj.*, आह्वनीयं N, आहवनीयस् $L_{ED}$ *(unmetrical)* **151** शान्तो ] $L_{ED}$, शान्तं N **151** घोरस् ] $L_{ED}$, घोरन् N **151** मूढस् ] $L_{ED}$, मूढन् N **153** वातः→समुदाहृतः ] $L_{ED}$, *om.*N **154** द्विजः ] $L_{ED}$, तु सः N **155** एकैकात्र ] $L_{ED}$, एकैकन्तु N **156** तासां ] N, तया $L_{ED}$ **156** यद् ] $L_{V}$, य N, च $L_{ED}$ **156** ओतं ] $L_{ED}$, ओतः N **156** प्रोतं ] $L_{ED}$, प्रोत° N **157** भू° ] $L_{ED}$, तु N *(unmetrical)* **158** जाग्रद्° ] $L_{ED}$, जाग्र° N **159** °संज्ञो ] $L_{ED}$, °संज्ञो भुवो N *(unmetrical)* **159** सोमसंज्ञित ] N, सोमसंज्ञक $L_{ED}$ **160** विसृष्टि° ] N, सृष्टिः $L_{ED}$ **161** स्यात् ] $L_{ED}$, तु N **162** सा ] $L_{ED}$, *om.* N **163** आद्या ] $L_{ED}$, आभ्यः N **163** गान्धर्व° ] $L_{ED}$, गान्धर्वी N **164** मकारसंज्ञा ] $L_{ED}$, तकारसंज्ञा वै N **165** प्रपञ्चो→बुधैः ] $L_{ED}$, *om.* N

अउमेति त्रयो मात्रा मकारश्चार्धमात्रिकः ॥
तिस्रो मात्रा लयं यान्ति ⁘ अर्धमात्रे न संशयः ।
अर्धमात्राप्यमात्रे ऽपि लयं याति निरामये ।
अकारे पीड्यमाने तु ⁘ उकारं प्रतिपद्यते ।
उकारे पीड्यमाने तु मकारं प्रतिपद्यते ॥
मकारे पीड्यमाने तु ⁘ अर्धमात्रा तदा भवेत् ।
जिह्वायां पीड्यमानायां निरालम्बं तदा भवेत् ॥
एकमात्रं द्विमात्रं वा त्रिमात्रं कृत्स्नमेव वा ।
$L_{ED}$ 2.35 ह्रस्वदीर्घप्लुतं शान्तं शान्तेन मनसा वहेत् ॥
समाहितमना भूत्वा तत्त्वध्यानपरायणः ।
ओंकारं यस्त्वभिध्यायेदाध्यात्मिक इति स्मृतः ॥
सर्वे वेदा यत्पदमामनन्ति
    तपांसि सर्वाणि च यत्तपन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
    तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ॥
एतदेवाक्षरं ब्रह्म ⁘ एतदेवाक्षरं परम् ।
एतदेवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥
⌜सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥
ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
$L_{ED}$ 2.40 यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥⌟

---

**166** अउमेति ] N, अउम इति N *(unmetrical)* **166** त्रयो ] N, तिस्रो N **166** मकारश् ] $L_{ED}$, तकारश् N **168** अर्धमात्राप्यमात्रे ऽपि ] N, अर्धमात्रात्वमात्रे $L_{ED}$ **174** ह्रस्वदीर्घप्लुतं ] $L_{ED}$, ह्रस्वं दीर्घं प्लुतं N **174** वहेत् ] N, हरेत् $L_{ED}$ **175** °मना ] $L_{ED}$, °मनो N **175** °ध्यान° ] $L_{ED}$, °ज्ञान° N **177** सर्वे ] $L_{ED}$, स सर्वे° N **178** तपांसि ] $L_{ED}$, तपानि N **178** यत्तपन्ति ] N, यत्तपन्ति $L_{ED}$ **180** संग्रहेण ब्रवीम्य् ] $L_{ED}$, संग्रहेणाभिधास्ये N **181** ब्रह्म ] $L_{ED}$, पुण्यम् N **183** सर्वद्वाराणि→गतिम् ] $L_{ED}$, *om.* N **183** सर्वद्वाराणि ] *em.*, सर्व द्वाराणि $L_{ED}$

आद्यं यत्त्र्यक्षरं ब्रह्म त्रयी यस्मिन्प्रतिष्ठिता ।
स गुह्यो ऽन्यस्त्रिवृद्वेदो यो वेदैनं स वेदवित् ॥ N 5r
यथा वै शङ्कुना पर्णाः संतृण्णान्येव सर्वशः ।
एवं सर्वास्तु वै वाचः संतृण्णाः प्रणवेण तु ॥
क्लेशकर्मविपाकैस्तु वासनाभिस्तथैव च ।
अपरामृष्टमेवाह पुरुषं हीश्वरं श्रुतिः ॥
वाच्यो यज्ञेश्वरः प्रोक्तो वाचकः प्रणवः स्मृतः ।
वाचके स तु विज्ञाते वाच्य एव प्रसीदति ॥
तदर्थं प्रणवं जप्यं ध्यातव्यं सततं बुधैः ।
ईश्वरः पुरुषाख्यस्तु तेनोपास्तः प्रसीदति ॥ $L_{ED}$ 2.45
यथा हि गौर्वत्सरुतं निशाम्य
हुंकृत्य वत्साभिमुखी प्रयाति ।
ब्रह्मापि तद्वत्प्रणवोपहूतं
वक्तारमागच्छति ⁘ आशु वक्त्रे ॥
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥

---

**187** *Manusmṛti* 11.265: आद्यं यत्त्र्यक्षरं ब्रह्म त्रयी यस्मिन्प्रतिष्ठिता । स गुह्यो ऽन्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित् ॥ **194** = *Śāktānandataraṅgiṇī* 9 *(japavidhi)*: तथा चोक्तं यामले …वाचके ऽपि च विज्ञाते वाच्य एव प्रसीदति **201** = *Amṛtabindūpaniṣad* 17: द्वे विद्ये वेदितव्ये तु शब्दब्रह्म परं च यत् । शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥

---

**187** यत्त्र्यक्षरं ] $L_{ED}$, यत्त्र्यक्षरं N **188** वेदो ] $L_{ED}$, वेधो N **189** पर्णाः N, पर्णं $L_{ED}$ **189** सतृण्णान्य्] N, संवृता $L_{ED}$ **189** सर्वशः ] N, सर्वतः $L_{ED}$ **190** सर्वास्तु ] $L_{ED}$, सर्वास N **190** संतृण्णाः ] *corr.*, सतृण्णाः N, संतीर्णाः $L_{ED}$ **191** विपाकैस्तु ] N, विपाकैश्च $L_{ED}$ **192** एवाह ] $L_{ED}$, एवाहुः N **192** पुरुषं ] $L_{ED}$, पुरुषो N **192** हीश्वरं ] $L_{ED}$, हीश्वरो N **192** श्रुतिः ] $L_{ED}$, स्मृतः N **193** वाच्यो ] $L_{ED}$, वाच्य° N **193** यज्ञेश्वरः ] $L_{ED}$, संज्ञेश्वरः N **194** वाचके स N, वाचकेन $L_{ED}$ **194** विज्ञाते ] N, विज्ञातो $L_{ED}$ **194** वाच्य ] $L_{ED}$, वाच्यम् N **196** ईश्वरः ] $L_{ED}$, ईश्वरं N **196** पुरुषाख्यस्तु ] $L_{ED}$, पुरुषाख्यन्तु N **196** तेनोपास्तः ] *corr.*, तेनोपास्तं N, तेनोपास्तुः (स्तः) $L_{ED}$ **197** निशाम्य ] N, निशम्य $L_{ED}$ **200** आशु ] N, चाशु $L_{ED}$

अन्तःशरीरप्रभवमुदानप्रेरितं च यत् ।
वागुच्चार्यं श्रोत्रवृत्ति शब्दब्रह्म तदुच्यते ॥
शब्दब्रह्मात्परं ब्रह्म तस्मिन्क्षीणे यदक्षरम् ।
तदक्षरं सदा ध्यायेद्यदीच्छेद्योगमात्मनि ॥
अकारश्चाप्युकारश्च मकारो बिन्दुरेव च ।
$L_{ED}$ 2.50 मात्रास्तद्विनियोगश्च प्रणवः पञ्चलक्षणः ॥
ओंकारः प्रणवे योज्यो ब्रह्मणि प्रणवस्तथा ।
आनन्दं तत्परं ब्रह्म तत्प्रविश्यामृतीभवेत् ॥
वेदादौ यः स्वरः प्रोक्तो वेदान्ते यः प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥
यतो वाचो निवर्तन्ते ⁘ अप्राप्य मनसा सह ।
आनन्दं ब्रह्मणो विद्वान्न बिभेति कदाचन ॥
$5^{v}$N प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥
स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
$L_{ED}$ 2.55 ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवत् ॥
शब्दस्पर्शादिभिश्चैव रसरूपैरलक्षितः ।
देवतायाः परायाश्च परायाश्च ⁘आलम्बः प्रणवः स्मृतः ॥

---

**213** = *Taittirīyopaniṣad* 2.4.1: यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् न बिभेति कदाचन ॥ **215** = *Muṇḍakopaniṣad* 2.2.4 **217** = *Śvetāśvataropaniṣad* 1.14 **220** *cit.* $T_{C}$ 8: आह च भगवान्याज्ञवल्क्यः—देवतायाः परायाश्च ह्यालम्बः प्रणवस्स्मृतः । कश्चिदाराधनाकामो विष्णोर्भक्त्या करोति वै ॥

---

**204** शब्दब्रह्म ] $L_{ED}$, ब्रह्मशब्दं N **205** शब्दब्रह्मात् ] $L_{ED}$, ब्रह्मशब्दात् N **205** क्षीणे ] $L_{ED}$, क्षीने N **206** यदीच्छेद्] $L_{ED}$, यदिच्छेद् N **206** आत्मनि ] N, आत्मनः $L_{ED}$ **207** मकारो ] $L_{ED}$, मकारं N **208** मात्रास्तद्विनियोगश्च ] $L_{ED}$, मात्रा तद्विनियोगंच N **209** ओंकारः ] $L_{ED}$, ओंकारं N **209** योज्यो ] $L_{ED}$, योज्यं N **209** प्रणवस्तथा ] $L_{ED}$, प्रणवन्तथा N **214** कदाचन ] N, कुतश्चन $L_{ED}$ **218** देवं ] $L_{ED}$, आत्मा N **220** परायाश्च] $T_{C}$, परो यश्च N, परस्यास्तु $L_{ED}$ **220** आलम्बः प्रणवः स्मृतः ] $L_{ED}$, आलम्बं प्रणवं स्मृतः N

कश्चिदाराधनाकामो विष्णोर्भक्त्या करोति वै ।
तदाराधनसांनैध्यं प्रतिमां व्यञ्जिकां यथा ॥
धातुदार्वादिपाषाणैः कृत्वा भावं निवेशयेत् ।
भक्त्या श्रद्धादराभ्यां च तस्य विष्णुः प्रसीदति ॥
एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् ।
एतदालम्बनं ज्ञात्वा ब्रह्मभूयाय कल्पते ॥ $L_{ED}$ 2.60
अदृष्टविग्रहो देवो भावग्राह्यो मनोमयः ।
तस्योंकारः स्मृतो नाम तेनाहूतः प्रसीदति ।
तस्मादोमिति पूर्वं तु कृत्वा युञ्जीत तत्परः ॥
ब्रह्मविदो ऽनेकविधाः सततं येन प्रवर्तन्ते ।
गूढव्रतस्य हि सदा विशुद्धबुद्धेः सुगूढचित्तस्य ।
प्रणवध्यानपरस्य च सुगूढतपसो भयं नास्ति ॥
एकाक्षरं परं ब्रह्म प्राणायामः परं तपः ।
सावित्र्यास्तु परं नास्ति मौनात्सत्यं विशिष्यते ॥
प्रणवे नित्ययुक्तस्य व्याहृतीषु च सप्तसु ।
त्रिपदायां च गायत्र्यां न भयं विद्यते क्वचित् ॥
आद्यास्तु व्याहृतीस्तिस्रो गायत्रीं स्वशिरोयुताम् ।
ओंकारं विन्दते यस्तु स मुनिर्नेतरो जनः ॥ $L_{ED}$ 2.65

**222** *cit.* $T_C$ 8: तदाराधनसान्निध्ये प्रतिमां व्यञ्जिकां यथा। धातुद्रव्यादिपाषाणैः कृत्वा ह्यवं निवेशयेत् ॥

**221** आराधनाकामो ] $L_{ED}$, आराधनेकामो N **221** करोति वै ] $L_{ED}$, तु येन वै N **222** सांनैध्यं ] *em.*, सानैध्य N, सिद्धार्थं $L_{ED}$ **222** प्रतिमां व्यञ्जिकां यथा ] $L_{ED}$, प्रतिमाव्यञ्जकं तथा N **223** °पाषाणैः ] $L_{ED}$, °पाषाणै N **224** भक्त्या श्रद्धादराभ्यां च ] $L_{ED}$, श्रद्धाभक्त्यादराभ्यान्तु N **227** भावग्राह्यो ] $L_{ED}$, भावग्राह्य° N **228** नाम ] $L_{ED}$, ब्रह्म N **229** तु ] $L_{ED}$, हि N **229** तत्परः ] $L_{ED}$, तत्पदम् N **230** ब्रह्मविदो ] $L_{ED}$, ब्रह्मविदा N **230** नेकविधाः ] $L_{ED}$, नैकविधः N **230** येन ] $L_{ED}$, यः N **230** प्रवर्तन्ते ] $L_{ED}$, प्रपद्यते N **232** °परस्य ] $L_{ED}$, °रतस्य N **232** च ] $L_{ED}$, तु N **236** च ] $L_{ED}$, तु N **236** गायत्र्यां ] $L_{ED}$, सावित्र्यां N **237** आद्यास्तु → स्वशिरोयुताम् ] $L_{ED}$, + N

N 6r एक एव हि विज्ञेयः प्रणवो योगसाधनम् ।
गृहीतः सप्तसिद्धान्तैरन्यश्च ब्रह्मवादिभिः ॥

[सप्त सिद्धान्ताः]

हिरण्यगर्भैः कपिलैरपान्तरतमैस्तथा ।
सनत्कुमारैर्ब्रह्मिष्ठैस्तथा पाशुपतैरपि ॥
पञ्चरात्रैश्च ⁘ इत्येतैः सिद्धान्तैश्चैव सप्तभिः ।
भेदैस्त्रिषष्टिभिर्भिन्नमेकैकं नवधा पुनः ॥

---

**239** हि ] $L_{ED}$, तु हि N **240** गृहीतः→ ब्रह्मवादिभिः ] $L_{ED}$, +N **240** गृहीतः ] $L_{ED}$, गृहीतं N **242** हिरण्यगर्भैः ] $L_{ED}$, +N **243** पाशुपतैरपि ] $L_{ED}$, +N **244** पञ्चरात्रैश्च ] N, पाञ्चरात्रैः $L_{ED}$ **244** इत्येतैः ] $L_{ED}$, सदोद्युक्तैः N **244** सिद्धान्तैश्चैव ] N, सिद्धान्तैरपि $L_{ED}$

## सर्वयोगसमुच्चयः

न वेदशास्त्रादन्यत्तु किंचिच्छास्त्रं हि विद्यते । 41$^{r}$N
सर्वं विनिःसृतं शास्त्रं वेदशास्त्रात्सनातनात् ॥
दुर्बोधं तु भवेद्यस्मादध्येतुं नैव शक्यते ।
तस्मादुद्धृत्य सर्वाणि शास्त्राणि ⁘ ऋषिभिः कृताः ॥
पुराणतर्कमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य तु चतुर्दश ॥
सांख्यं योगं पञ्चरात्रं वेदाः पाशुपतं तथा ।
अतिप्रामाणान्येतानि हेतुभिर्न विचालयेत् ॥
सांख्यस्य वक्ता कपिलः परमार्षिः स उच्यते ।
हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः ॥
पञ्चरात्रस्य सर्वस्य वक्ता नारायणः स्वयम् ।
अपांतरतमश्चैव वेदाचार्यः स उच्यते ॥
प्राचीनगर्भं तमृषिं प्रवदन्तीह के चन । 41$^{v}$N
उमापतिः पशुपतिः श्रीकण्ठो ब्राह्मणः सुतः ॥
प्रोक्तवानिति चाव्यग्रं ज्ञानं पाशुपतं भवः ।
अत ऊर्ध्वं तु ये के चिद्धेतुशास्त्रण्यनेकशः ॥
बौद्धकापालिकुहका लोकायतनभिन्दकाः ।

---

7 सांख्यं→भवः ⇑ MaBhā 12.337.59–63ab

---

1 अन्यत्तु ] $L_{ED}$, अन्यस्तु N  2 सर्वं विनिःसृतं शास्त्रं ] $L_{ED}$, निःसृताः सर्वशास्त्राणां N  2 °शास्त्रात् ] $L_{ED}$, °शास्त्र° N  4 सर्वाणि ] N, सर्वं हि $L_{ED}$  4 शास्त्राणि ] N, शास्त्रं तु $L_{ED}$  4 कृताः ] N, कृतम् $L_{ED}$  6 वेदाः ] $L_{ED}$, वेद° N  6 तु ] N, च $L_{ED}$  7 पञ्चरात्रं ] N, पाञ्चरात्रं $L_{ED}$  8 विचालयेत् ] $L_{ED}$, विवा+येत् N  9 वक्ता ] N, कर्ता N  9 परमार्षिः ] N, परमार्थः $L_{ED}$  10 योगस्य ] $L_{ED}$, योगश्च N  10 वक्ता→ऋषिं ] $L_{ED}$, +N  13 प्रवदन्तीह ] N, प्रवदन्ति हि $L_{ED}$  14 ब्राह्मणः ] N, ब्रह्मणः $L_{ED}$  15 इति चाव्यग्रं ] N, इदमत्युग्रं $L_{ED}$  15 भवः ] N, हरः $L_{ED}$  16 धेतुशास्त्रण्य् ] N, वेदशास्त्रण्य् $L_{ED}$  17 लोकायतन° ] N, लोकायतिक° $L_{ED}$  17 भिन्दकाः ] N, भिन्नकाः $L_{ED}$  17 °कापालि°] $L_{ED}$, कापिलि N

वेदबाह्यास्तथान्ये तु तामसा अशिवास्तु ते ॥
नैरात्म्यवादकुहकैर्मिथ्यादृष्टान्तहेतुभिः ।
वेदशास्त्रस्य बाधन्ते पौरुषेयास्तु ते स्मृताः ॥
आसुरेयास्तथान्यास्तु बृहस्पतिकृतास्तु ये ।
शुक्ररूपं समास्थाय देवानां हितकाम्यया ॥
प्रजापतिकृताश्चान्ये असुरान्मोहनाय च ।
येनेदं वाङ्नयं दुग्धमधर्मे विफलीकृतम् ॥
आत्मानं भूषयेन्नित्यं भोजनाच्छादनादिभिः ।
स्वदेहं चैव दैवत्यमन्यच्चैव न विद्यते ॥
असत्यमप्रतिष्ठं च जगदाहुरनीश्वरम् ।
अयं लोको ऽस्ति न परः पुनःसंभवनं कुतः ॥
पर्णबुद्बुदवच्चायं संभवश्च पुनः पुनः ।
स्वेच्छयोत्पद्यते चैव स्वेच्छया च प्रलीयते ॥
जातिप्राधान्यकं नास्ति एकजातिसमुद्भवम् ।
न वेदो नैव यज्ञाश्च न दानानि तपांसि च ॥
$42^r$N न कार्यं नैव नाकार्यं सर्वं कुर्यादशङ्कया ।
एतदासुरकं भावं समाश्रित्य विनश्यति ॥
नैयायिकार्थमालोक्य तथा हीश्वरकारणम् ।

**27** = *Bhagavadgītā* 16.8ab

**18** वेदबाह्यास् ] $L_{ED}$, वेदबाह्यस् N **18** तथान्ये तु ] $L_{ED}$, तथान्यास्तु N **18** ते ] $L_{ED}$, ताः N **19** नैरात्म्यवाद° ] $L_{ED}{}^{pc}$, नैरात्म्यवाद° $L_{ED}{}^{ac}$, नैरात्म्यपादः N **20** वेदशास्त्रस्य ] *em.*, वेदशस्त्रस्य N, वेदशास्त्रं तु $L_{ED}$ **20** ते ] $L_{ED}$, ताः N **21** तथान्यास्तु ] N, पाशुपता N **21** ये ] $L_{ED}$, याः N **22** शुक्ररूपं ] N, शुक्रं रूपं $L_{ED}$ **23** चान्ये ] $L_{ED}$, चान्या N **23** असुरान् मोहनाय च ] N, असुराणां प्रमोहनाः $L_{ED}$ **26** स्वदेहं चैव ] N, स्वदेहमेव $L_{ED}$ **26** अन्यच्चैव न ] एम्, अन्यश्चैव न N, अन्यन्नैवात्र $L_{ED}$ **28** संभवनं ] $L_{ED}$, सहननं N **29** पर्ण° ] N, जल°$L_{ED}$ **29** संभवश्च ] N, संभवेच्च $L_{ED}$ **31** °समुद्भवम् ] N, °समुद्भवः $L_{ED}$ **32** दानानि ] N, दानं न $L_{ED}$ **33** नाकार्यं ] N, नाकार्यं $L_{ED}$ **34** एतदासुरकं ] $L_{ED}$, एतदाशुकरम् N **35** नैयायिकार्थमालोक्य ] $L_{ED}$, नव्यायिकार्थमाला च N **35** हीश्वरकारणम् ] $L_{ED}$, ह्येश्वरकारणात् N

प्रतिष्ठानानि वेदस्य एते तर्का उदाहृताः ॥
प्रत्यक्षं चानुमानं च शास्त्रं च विविधागमम् ।
त्रयं सुविदितं कार्यं कर्मशुद्धिमभीप्सिता ॥
यत्किंचित्कस्यचिद्धर्मो मनुना परिकीर्तितः ।
स सर्वो ऽभिहितो वेदे सर्वज्ञानमयो हि सः ॥
तस्माद्वेदादृते नान्यदधीतव्यं द्विजन्मना ।
वेदबाह्यं तु यच्छास्त्रं नाधीतव्यं कथं चन ॥
या वेदबाह्याः श्रुतयो याश्च काश्च कुदृष्टयः ।
सर्वास्ता निष्फलाः प्रोक्तास्तमोनिष्ठा हि ताः स्मृताः ॥

---

**37** प्रत्यक्षं→अभीप्सिता ] = *Manusmṛti* 12.105 **39** यत्किंचित्→हि सः ] = *Manusmṛti* 2.7
**43** या वेदबाह्याः→तमोनिष्ठा ] = *Manusmṛti* 12.95

---

**38** त्रयं ] $L_{ED}$, त्रयः N **38** अभीप्सिता ] $L_{ED}$, अभीप्सया N **39** यत्किंचित् ] N, यः कश्चित् $L_{ED}$ *Manusmṛti* **41** अधीतव्यं ] N, अध्येतव्यं $L_{ED}$ **42** यच्छास्त्रं ] N, यत्किंचित् $L_{ED}$ **42** नाधीतव्यं ] N, नाध्येतव्यं N **42** कथं ] N, कदा $L_{ED}$ **43** वेदबाह्याः ] $L_{ED}$, वेदबाह्या N **43** श्रुतयो ] N, स्मृतयो $L_{ED}$ **43** याश्च काश्च ] N, याः काश्चन $L_{ED}$ **44** निष्फलाः ] $L_{ED}$, निष्फला N **44** प्रोक्तास् ] $L_{ED}$, प्रोक्ता N

# Notes

**4:3** ***bhagavantaṃ yājñavalkyam*** ] $L_{ED}$ reads a rare *ra-vipulā* which may be the *lectio difficilior*. We could emend N to *bhagavadyājñavalkyaṃ* to avoid N and $L_I$'s syntactically inconstruable nominative *bhagavān*. N continues with either *yājñavalkyas-tu* or *yājñavalkyam-tu*, the former reading being also found in $L_I$.

**4:17** $L_{ED}$ adds a half-line from $L_V$ to supply a main clause at this point: *tadācakṣva mahābhāga sarvayogavidāṃvara*.

**5:22** ***japayukti°*** ] A synonym for *japayoga* in the sense of *japayajña*. On *japayajña* see *Yājñavalkyasmṛti* 1.101, *Manusmṛti* 2.85, *Bhagavadgītā* 10.25. See GONDA, *Vedic Ritual* (1980:228).

**5:35** ***abliṅgāny*** ] Name of the verses *Ṛgveda* X.9.1–3 (more commonly fem. *abliṅgā*). For the neuter form (←*Yajūṃṣi*) *cf.* *Yājñavalkyasmṛti* 3.30cd: *abliṅgāni japec caiva gāyatrīṃ manasā sakṛt*.

**6:41** ***ātmayajña°*** ] "Self-immolation". $L_{ED}$ reads here *annayajña*, "offering of food". On *ātmayajna* see J.C. HEESTERMAN, 1984, "Self-sacrifice in Vedic Ritual", in S. SHAKED, D. SHULMAN, G.G. STROUMSA, eds., GILGUL: *Essays on Transformation, Revolution and Permanence in the History of Religions, dedicated to R.J.* ZWI WERBLOWSKY, Leiden: E.J. Brill, pp. 91–106. Atsuko IZAWA, 1996, "Prāṇāgnihotra to Ātmayajna", *Inbutsuken* 44-2.

**6:44** ***tu vacanaṃ*** ] A *na-vipulā* to mark end of section.

**6:45** ***rāja·ṛṣīṇāṃ*** ] Alternative *sandhi* for *rājarṣīṇāṃ*. Perhaps intended as *rājñām ṛṣīṇāṃ ca*, for both kings and sages are mentioned in 1.00, and the only "royal sage" mentioned is Janaka. We may also consider emending to: *rājñām ṛṣiṇāṃ*.

**6:55** ***vyāhṛtīś caiva*** ] An *ārṣa* nom. pl. $L_{ED}$'s *vyāhṛtayaś ca* results in a rare *sa-vipulā*, where a caesura after the fourth syllable is normally required. Here a break at *vyā-hr* is possible, though clumsy.

**7:63** ***sthāṇugartaṃ*** ] *Cf.* *Śrutaprakāśikā* 000: *nanu yo ha vā aviditārṣeyaccchandodaivatena mantreṇa yajati yājayati vādhyāpayati vā* ***sthāṇuṃ varcchati gar-***

***taṃ vāpadyate pravāmīyate*** *pāpīyān bhavati yātayāmānyasya cchandāṃsi bhavanti | atha "yo mantre mantre veda sa sarvam āyur eti | śreyāṃś ca bhavati ayātayāmānyasya cchandāsi mavanti tasmād etāni mantre mantre vidyād iti śrutyā aviditvām ṛṣiṃ cchando daivataṃ yogam eva ca yo 'dhyāpayej japedvāpi pāpīyān jāyate tu sa" iti smṛtyupabṛṃhitayārthajñānavidhānaṃ phalitam*; *Tattvaṭīkā* 208.84: *nanu yo ha vā aviditārṣeyaccchandodaivatena mantreṇa ityādiśrutibhiḥ, aviditvā ṛṣiṃ cchandaḥ yadadhītamavijñāta mityādibhiḥ smṛtibhiś ca viparyaye doṣoktyārthajñānam avaśyasampādyatvena sthāpita[ṃ]; tadabhāve 'dhyayanasya naiṣphalyaṃ tatsadbhāve sarvapuruṣārthāvāptiścocyat —* ***sthāṇur ayaṃ bhārahāraḥ kilābhūd*** *adhītya vedaṃ na vijānāti yo 'rtham |*

**7:70** ***viniyogaṃ brāhmaṇaṃ ca*** ] A *ra-vipulā*.

**7:70** ***jñānakarma*** ] "Deliberate, knowing engagement with ritual". The original idea may have been rather the opposite: *ajñānakarma, akāmapuṇya*, the unintentional acquisition of merit by accidentally performing a meritorious ritual action. See . J. Ensink, "Problems of the Study of Pilgrimage in India". *Indologica Taurinensia* 2:67, 1974, n. 33.

**7:71** ***ekaikasya ∵ ṛṣeḥ*** ] N: "He who knows..., becomes a praiseworthy guest to each and every seer." $L_{ED}$ is less convincing (and lacks the irregular, and therefore probably original, *sandhi* hiatus): "He who knows...of each and every *ṛc*-verse, becomes as praiseworthy as a guest."

**8:77** ***balināny*** ] An *ārṣa* neut. nom. pl. for the regular *balīni*.

**8:87** ***vāsasī*** ] *Cf. Chāndogya Upaniṣad* 1.4.2: *yad ebhir acchādayaṃs tac chandasāṃ chandastvam |*

**8:88** ***ātmānaṃ*** ] Perhaps intended as an *ārṣa* nom. sg. neut.? Possibly also a corruption of the variant *ātmanācchāditaṃ devair* preserved in Rāghavabhaṭṭa's PaArDa$_{ED}$ 1.5.

**8:89** ***smṛtāḥ*** ] *smṛtāḥ metri causa* for *smṛtāni*.

**9:105** ***oṃkāram*** ] Here a neuter.

**9:108** ***tenopāstaṃ...*** ] "It *(oṃkāra)* was worshipped by him (Prajāpati), therefore, it possesses brahma(-status), the Ṛṣi is Svayambhuva." Or we could read: "It was worshipped by him (Prajāpati), therefore, for this self-born (*oṃkāra*), the Ṛṣi is Brahman."

**11:148** ***traiṣkālyas*** **]** An *ārṣapāṭhaḥ*, *cf.* the *aiśa* parallel in *Tantrasadbhāva* 9.578c: *traiṣkālyam pūjayed devaṃ*.

**12:150** ***āhvanīyas*** **]** An *ārṣapāṭha* metri causa, $L_{ED}$ 's reading is unmetrical.

**12:150** ***tridhātmakam*** **]** The expected *tridhātmakaḥ* is found in the citation in the *Kṛtyakalpataru Mo* 197. Given that N has *tridhātmakam* we may suspect rather that we should adopt the forms *gārhapatyaṃ* etc.

**10:117** ***tailadhārāvat*** **]** = *Dhyānabindūpaniṣad* 18: *tailadhārām ivācchinnaṃ dīrghaghaṇṭāninādavat | avācyaṃ praṇavasyāgraṃ yas taṃ veda sa vedavit ||*; = *Yogacūḍāmaṇyupaniṣad* 80: *tailadhārām ivācchinnaṃ dīrghaghaṇṭāninādavat || praṇavasya dhvanis tadvat tadagraṃ brahma cocyate ||*. Śaṅkara on *Bhagavadgītā* 13.24 uses the expression to define *dhyāna*: *tailadhārāvat saṃtato 'vicchinnapratyayo dhyānam |*

**14:189** ***yathā vai śaṅkunā parṇāḥ saṃtṛṇṇāny eva sarvataḥ*** **]** The expected reading *parṇāni* would be hypermetrical. The passage is a reformulation of *Chāndogya Upaniṣad* 2.23.3: *tad yathā śaṅkunā sarvāṇi parṇāni saṃtṛṇṇāny evam oṅkāreṇa sarvā vāk,* "Just as all leaves are held together/pierced by veins, so is all speech by Oṃ". [Śaṅkara *ad loc: tāny akṣarāṇy abhyatapat tebhyo 'bhitaptebhya oṅkāraḥ samprāsravat tad brahma, kīdṛśam ity āha—tadyathā śaṅkunā parṇanālena sarvāṇi parṇāni patrāvayavajātāni santṛṇṇāni nividdhāni vyāptānītyarthaḥ*] In $L_{ED}$'s reading the expected *saṃvṛtam* would be unmetrical (pl. by attraction from *saṃtīrṇāḥ*). Or read with *vācaḥ* and interpret *tu* as *ca*.

**14:191** ***īśvaraḥ*** **]** A reformulation of the definition of *īśvara* given in *Yogasūtra* 1.24: *kleśakarmavipākāśayair aparāmṛṣṭaḥ puruṣaviśeṣa īśvaraḥ*.

**14:198** ***vatsarutam*** **]** *Cf. Mahābhārata* 13.61.27ab: *yathā dhāvati gaur vatsaṃ kṣīram abhyutsṛjanty uta*. *Kāṭhakasaṃhitā* 27.9: *tasmād gaur vatsād apakriyamāṇā punar abhinivartate prajāpatiḥ prajās sṛṣṭvā tā abhihiṅkarot prajāpatir āgrāyaṇo yadāgrāyaṇaṃ gṛhītvā hiṅkaroti tasmād gaur vatsaṃ jātam abhihiṅkaroti.*

**14:201** ***śabdabrahma*** **]** Upaniṣadbrahmayogin on *Amṛtabindūpaniṣad* 17: *śabdabrahma yāthātmyajñānataḥ śabdaprapañcanirasanapūrvakaṃ tadarthabrahmādhigamo bhavatīty āha—dve iti | śabdabrahma parabrahmeti yat brahma dvividhaṃ tacchabdaparabrahmagocare dve vidye veditavye saguṇanirguṇabrahmayāthātmye jñātavye | tuśabdo vadhāraṇārthaḥ | tayor upāyopeyātmakatvāt tatropā-*

*yabhūte śabdabrahmaṇi saviśeṣabrahmaṇi niṣṇāto muniḥ—praṇavavācyabrahmānusaṃdhānataḥ nirviśeṣabrahmajñānam udeti—tajjñānodayasamakālaṃ svātiriktasarvāpahnavasiddhaṃ brahma niṣpratiyogikasvamātram iti paraṃ brahmādhigacchati | tanmātratayā vidvān avaśiṣyata ityarthaḥ ||*

**18:4** ***sarvāṇi śāstrāṇi…kṛtāḥ*** **]** $L_{ED}$ avoids the awkward gender disagreement.

**18:7** ***sāṃkhyaṃ*** $\rightarrow$ ***bhavaḥ*** **]** ⇑ The passage occurs in the critical text of the MaBhā as follows (12.337.59–63a):
*sāṃkhyaṃ yogaṃ pañcarātraṃ vedāḥ pāśupataṃ tathā |*
*jñānāny etāni rājarṣe viddhi nānāmatāni vai ||*
*sāṃkhyasya vaktā kapilaḥ paramarṣiḥ sa ucyate |*
*hiraṇyagarbho yogasya vettā nānyaḥ purātanaḥ ||*
*apāntaratamāś caiva vedācāryaḥ sa ucyate |*
*prācīnagarbhaṃ tam ṛṣiṃ pravadantīha ke cana ||*
*umāpatir bhūtapatiḥ śrīkaṇṭho brahmaṇaḥ sutaḥ |*
*uktavān idam avyagro jñānaṃ pāśupataṃ śivaḥ ||*
*pañcarātrasya kṛtsnasya vettā tu bhagavān svayam*
At *Tattvavaiśāradī* 1.1 Vācaspatimiśra cites YoYā's 12.5 and explicitly indentifes the source as the *Yogiyājñavalkyasmṛti*: *nanu—"hiraṇyagarbho yogasya vaktā nānyaḥ purātanaḥ" iti Yogiyājñavalkyasmṛteḥ kathaṃ patañjaler yogaśāstrakartṛtvam ity āśaṅkya sūtrakāreṇānuśāsanam ity uktam | śiṣṭasya śāsanam anuśāsanam ity arthaḥ |*

The passage is cited frequently, e.g. in the *Bhāvaprakāśikā* on the *Śrutaprakāśikā* (*Utpattyasambhavādhikāra*) 2.2.42: *…iti sāṅkhyādyāgamānāṃ vaidikamatāntaratvaṃ nārāyaṇaikaniṣṭhatvaṃ ca pratipāditam |*

*Yogayājñavalkya* 12.4 is close to the citation in *Bhāvaprakāśikā*: *tathā—sāṅkhyaṃ yogaḥ pāñcarātraṃ vedāḥ pāśupataṃ tathā | ātmapramāṇāny etāni na hantavyāni hetubhiḥ ||* . *Cf.* also MaBhā 14.96.15 *bhārataṃ mānavo dharmo vedāḥ sāṅgāś cikitsitam | ājñāsiddhāni catvāri na hantavyāni hetubhiḥ ||*.

The reading *avyagraṃ jñānaṃ* is also seen in the citation in *Tattvapradīpa Śāstrayoniyvādhikāra* 3: *uktavān idam avyagraṃ jñānaṃ pāśupataṃ śivaḥ*.

**19:20** ***vedaśāstrasya*** **]** An objective genitive for which $L_{ED}$ supplies the more expected accusative but then needs to add an unnecessary particle for the meter.

**19:21** ***tathanyās*** ] $L_{ED}$ reads here *pāśupatā*, which would have to be a different type of *āsureyapāśupatas*. *Adhikaraṇacintāmaṇi* 2: *"vratam etat pāśupatam" iti raudraṃ vratam upaniṣady api kvacit pradeśe prakhyātam | atas taduktiḥ pramāṇam ity āśaṅkya nirākaroti —maivam iti | yady api rudraḥ sarvajñatvādiguṇagaṇopetaḥ, tathāpi bhagavatā puruṣottamena "tvaṃ hi rudra mahābāho mohaśāstrāṇi kāraya" ity asuramohanārtham ādiṣṭa eṣa rudro nijaṃ tantrakam akṛta | tatas tattantraṃ śiṣṭopajīvyaṃ na bhavati.*

**19:28** ***ayaṃ loko 'sti na paraḥ*** ] *Cf.* MaBhā 12.131.13: *nāyaṃ loko 'sti na para iti vyavasito janaḥ / nālaṃ gantuṃ ca viśvāsaṃ nāstike bhayaśaṅkini //*

**19:29** ***parnabudbudavac cāyaṃ sambhavaś ca*** ] Here *ayaṃ* refers most naturally to *lokaḥ*, though an understood *jīvaḥ* is also possible. For *lokaḥ cf.*, e.g., Śaṅkara on *Bṛhadaraṇyaka* 2.1.20: *yasmād ātmanaḥ sthāvarajaṅgamaṃ jagad idam agnivisphuliṅgavad vyuccaraty aniśam, yasminn eva ca pralīyate jalabudbudavat...* For *jīvaḥ cf.*, e.g., MaBhā 7.55.16c *aho hy anityaṃ mānuṣyaṃ jalabudbudacañcalam*, similarly *Ṣaḍdarśanasamuccaya lokāyatamatam* p.451: *jalabudbudavaj jīvāḥ.*

**19:33** ***na kāryaṃ naiva nākāryaṃ*** ] *Cf. Mālinīvijayottara* 18.74–79ab:
*nātra śuddhir na cāśuddhir na bhakṣyādivicāraṇam |*
*na dvaitaṃ nāpi cādvaitaṃ liṅgapūjādikaṃ na ca ||*
*na cāpi tatparityāgo niṣparigrahatāpi vā |*
*saparigrahatā vāpi jaṭābhasmādisaṃgrahaḥ ||*
*tattyāgo na vratādīnāṃ caraṇācaraṇaṃ ca yat |*
*kṣetrādisaṃpraveśaś ca samayādiprapālanam ||*
*parasvarūpaliṅgādi nāmagotrādikaṃ ca yat |*
*nāsmin vidhīyate kiṃ cin na cāpi pratiṣidhyate ||*
*vihitaṃ sarvam evātra pratiṣiddham athāpi vā |*
*kiṃ tv etad atra deveśi niyamena vidhīyate ||*
*tattve cetaḥ sthirīkāryaṃ suprayatnena yoginā |*
*Timirodghāṭana* fol. 28ʳ:
*yena yena tu veśena yena tena vratena vā |*
*na yatra [na anācāro] dvaitādvaita[ṃ] yathepsayā ||*
*Kulasāra* fol. 83ʳ:
*bhasmaṃ liṅgaṃ jaṭā[ṃ] tyajya tyajya liṅgādikāṃ kriyāṃ |*
*sadāguptena bhāvena gūḍhagoca[ra]saṃsthitaḥ ||*